M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1140

Title: Sam[illegible]sepa Sclā vidhi

1140

Complete

	:	: Samkṣepa Śāti Vidhi	: **Title**
	:	:	: Author
	:	:	: Editor
	:	:	: Year, Vols.
	:	:	: Publisher
1140	:	:	: Remarks

श्रीगणेशाय नमः ॥ अथ संक्षेपप्रासाद[redacted]शालाभवविधिः ॥ सुमुखश्चेत्यादि पुण्यतिथौ मम कृत
~~प्रस्ताव~~ अमुकदेवतायाः प्रासादसंलग्नशालां शैलादि दारुमयां निर्माणसमये प्राणिहिंसादिदोषपरिहा
रार्थं कल्पोक्तफलप्राप्त्यर्थं श्रीअमुकदेवताप्रीत्यर्थं कात्यायनोक्तशालाविधिं करिष्ये तदंगत्वेन स्वस्ति
पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यादिवरणं च करि॰ तत्रादौ महागणपतिपूजनं कृ॰ क्रमेणै
तानि कृत्वा आचार्यस्तु॰ अथाचार्यः कर्मसंकल्प्य अभिमतालाविधिकर्मणि आचार्यकर्म करिष्ये॰ यद
संस्थितमिति श्लोकद्वयेन गौरसर्षपान् विकीर्य॰ शुचीवहृतिपंचगव्येन प्रोक्ष्य॰ आपोहिष्ठेति शुद्धोदकेन स
शालां प्रोक्ष्य॰ स्वस्त्ययनं तार्क्ष्यमिति प्रार्थ्य॰ विष्णोर्देवयजनं रक्षस्वेति॰ संस्कृतभूमौ मध्ये कुंडं
स्थंडिलं वा हस्तमात्रं कृत्वा॰ तत्र वेदिकलशं स्थापयेत्॰ महीद्यौरित्यादिना वरुणपूजनांतं कृत्वा प्रार्थयेत् क
लशस्य मु॰ देवदानवसंवादे मथ्यमाने महोदधौ॰ उत्पन्नोऽसि तदा कुंभ विधृतो विष्णुना स्वयं त्वत्तोये सर्वतीर्था
निदेवाः सर्वे त्वयि स्थिताः॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च
प्रजापतिः॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः॥ त्वत्त
प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॰ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा॰ इति प्रार्थ्य कुंडे स्थंडिले वा ग
र्भोक्तरीत्याग्निप्रतिष्ठाप्य ईशान्यां ग्रहवेदीं निर्माय तत्र आदित्यादिग्रहाणामावाहनादि कलशस्थाप
नांतं कृ[redacted]ह अन्वाधानं कुर्यात् ततः चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानं आदित्यादिनवग्रहान् अर्का
दिजातीयसमिदाहुतिभिः अष्टोत्तरशतअष्टाविंशतिसंख्याकाभिः वा तावतीभिः चर्वाहुतिभिः आज्या

कृतिभिश्च । ईश्वरं उमां स्कंदं नारायणं ब्रह्माणं इंद्रं यमं कालं चित्रगुप्तं अग्निं अपः भूमिं विष्णुं इंद्रं इंद्राणीं प्रजा
पतिं सर्पान् ब्रह्माणं एताः अधिदेवताः प्रत्यधिदेवताश्च समिदाकृतिभिः अष्टाष्ट संख्याकाभिः तावती
भिः चर्वाकृतिभिः आज्याकृतिभिश्च । विनायकं दुर्गां वायुं आकाशं अश्विनौ वास्तोष्पतिं क्षेत्रपालं
इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं सोमं ईशानं एताः क्रतुसंरक्षकदेवताश्च समिदाकृतिभिः
चतुश्चतुः संख्याकाभिः तावतीभिः चर्वाकृतिभिः आज्याकृतिभिश्च वरुण अष्टोत्तरशतसंख्या
काभिः । तत्त्वायामीति मंत्रेण पूर्णत्वामामित्युभ्नः शेषो वरुण त्रिष्टुप् । आज्यहोमे विनियोगः । वास्तोष्पत
इति वत्सऋषिर्वसिष्ठो वास्तोष्पतिर्त्रिष्टुप् अंत्या गायत्री । होमे वि० वास्तोष्पतिं अष्ट प्रत्येकं अ
ष्टाविंशति संख्याकाभिः औदुंबर समिदाकृतिभिः चर्वाकृ अष्टौ पर्वोक्त मंत्रैः । शेषेण स्विष्टकृदमित्या
दि सद्योयस्य । प्रधानहोमानंतरं देवतामयं प्रासादं ध्यायेत् । प्रासादे सर्वदेवप्रजापतिः अस्त्वेतरशत्ना
ततो यानमः इति यथाशक्त्या पूजयेत् । ततः स्विष्टकृतादि प्रायश्चित्त होमांतं कृत्वा इंद्रादिभ्यो
बलीन् दद्यात् । ग्रहेभ्यश्च । ततो दशदिशा बलिर्दर्भः । सानाहनायेस परिवारयुताय सशक्तिकाय स
प्राच्यै पार्षदाय सपताकाय सर्वभूताय एष बलिर्नमम । आग्नेय्यै । दक्षिणायै । नैर्ऋत्ये । पश्चिमायै । वायव्ये ।
उदीच्यै । ईशान्यै एष बलिर्नमम । ततो क्षेत्रपालबलिं दद्यात् । सर्वबलि प्रार्थना । बलिं गृह्णंतु इमे

देवा आदित्या वसवस्तथा । मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः । असुरा यातुधानाश्च पि
शाचा डाकिनीगणाः । शाकिन्यो यक्षवेताला योगिन्यः विघ्नविनायकाः । जगतां शांतिकर्तारो ब्र
ह्माद्याश्च मातरः । माविघ्नमस्तु रोगाणां मा संतु परिपंथिनः । सौम्या भवंतु तृप्ताश्च भूतप्रेत
सुखावहाः । भूतानि यानीह वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तं । अन्यत्र वासं कुरुते स
यंतु स्मरेन तान्यन्नं तत्र मोक्षु तेभ्यः इति बलिं प्रार्थ्य । ततः अभिषेकं कुर्यात् । सुरास्त्वे होमशेषं समे
त्वादिना । स्नापयेयुः प्रासादस्य शान्तकोणमध्ये धं शायैनमः इति संपूज्य प्रार्थयेत् । स
र्वदेवमयं नास्तु पास्तु देवकर्यं परमितिसंप्रार्थ्य । ततो त्रिसप्तापावमानेन राक्षोघ्नेन वस्तकेन
शान्तेर्येयेत् । ततो दुग्धपूर्णजलपूर्णाभ्यां स्नानकुंभाभ्यां तेनेवस्त्रकेन प्रागादितो अविच्छिन्नंधा प्रासादं
रांकुर्यात् । एवं स्नापित वरुण कुंभं गृहीत्वा प्रासादं शिरप्रोक्षयेत् । औषधं देव्याय कर्मणे दे द्वये
वयज्यायै इति मंत्रेण ततो यथाशक्त्या प्रासादं पूजयेत् ध्वजं पताकेन । ततो यज
मानः सकुटुंबः तिलजलमादाय देशकालौ स्मृत्वा अस्यां शैलेष्टका दारुमय शालां यथो
शक्त्या भूषितां प्रतापतिदेवत्यां सर्वपापक्षयपूर्वक भगवत्प्रीतिकामः सर्वसत्वेभ्यो ह्युत्सृ
जामि इति जलाक्षतान् मंत्रोक्षिपेत् ततो प्रासादाधिदेवं यथाशक्त्या षोडशोपचारैः पूज
येत् प्रार्थयेच्च । आवाहनं न० ततो यजमानः अग्ने पश्चिमत उपविश्य आचार्यं संपूज्य से

वस्त्रांगांदद्यात् गवांगंगे सर्त्विग्भ्यो यथा॥ दक्षिणां दत्वा आवाहितदेवताः संपूज्य विसृज्य आ
चार्याय निवेद्य अग्निं संपूज्य गच्छ गच्छेति विसृज्य शांतिपाठं कारयित्वा श्रीपरमेश्वरप्रीत्यर्थं अ
२ तिदिनं त्रीन् एकैकं वा ब्राह्मणान् भोजयित्वा भूयसीं दक्षिणां दत्वा आशिषो गृहीत्वा परमेश्व
रार्पणं कुर्यात् इति संक्षेपशालाविधिः ॥ इदं पत्रं जक्योपाभिधभास्करस्य ॥